निपाताः सन्त इति । एवं व्याख्यानेन गतिनिपातसंज्ञयोः समावेशसिद्धि-र्यत्र तु व्यवधानेन प्रयोगस्तत्र ते प्राग्धातोरिति सूत्रस्य संज्ञानियमत्वपक्षे गतिसंज्ञाऽभावेऽपि निपातसंज्ञा भवत्येव तेनाव्ययसंज्ञायां सुपो लुक्सिद्धिः ॥ क्रियाशब्दार्थं व्याचष्टे । मर्यादेति ॥ खलिति । भाव इति शेषः । यस्तु कर्त्तृल्युडन्तो दासीवाची यश्च कर्मल्युडन्तः श्लोकवाचकस्तं व्युदस्यति । दासीत्यादि । व्याख्यानादिति । गतिश्चेतिसूत्रभाष्ये कारिकाशब्दस्योपसंख्यानमितिवार्त्तिकव्याख्यानावसरे कारिकाकृत्येत्युदाहृतन्तत्र कैयटेनोक्तं क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात् क्रियावृत्ते ग्रहणादिति तन्मूलकादित्यर्थः । अयम्भावः क्रियायोगश्च नान्वयरूप एव विवक्षितः । किन्तु वाच्यवाचकभावोऽपि गृह्यते विनिगमनाविरहात् । एवञ्च प्रकृते तु द्वितीये एव प्रयोगदर्शनादवसीयत इति ॥ संज्ञानियमार्थत्व इति । धातोः प्राक्प्रयुज्यमानानामेव गत्युपसर्गसंज्ञा इत्येवंरूप इत्यर्थः । प्रयोगनियमार्थ इति । अयमेव पक्षः सूत्रकारसम्मतः । अत एव छन्दसि परेऽपि व्यवहिताश्चेतिसूत्रे प्रणीतवान् ॥ इदमिति । अनितिपरग्रहणमित्यर्थः । अत एव । संज्ञानियमस्याभिप्रेतत्वादेव । ननु संज्ञानियमपक्षेऽपि कटं सुकराणीति प्राप्नोत्यत आह । कटं सुकराणीति ॥ अनभिधाने मानन्तु सूत्रद्वयारम्भपक्षे सु कटं कराणि वीराणीत्यत्र गतेः प्राक्प्रयोगः प्राप्नोतीत्युक्तम् । तत इष्टापत्तिनिवारणार्थम्मुमर्थं कृतस्य कर्त्तृकर्मणोश्च भूकृञोरितिसूत्रविहितखल खित्वस्य ज्ञापकत्वोपपादनसमर्थे यदि चात्र गतेः प्रयोगः स्यात्खित्करणमनर्थकं स्याद्गतेरव्ययत्वादित्युक्तम् । अत्र प्राप्नोति स्यादितिशब्दोच्चारणेनाभिधानमेव । अत्र पक्षे । खलः खित्वेन ज्ञापकेन संज्ञानियमार्थत्वसमर्थनपक्षे । एतद्विशेषणाभाव इति । अनितिपरमितिविशेषणाभाव इत्यर्थः ॥ एतद्बलादेव । पर ग्रहणबलादेवेत्यर्थः । तस्य । परग्रहणस्य ॥ अनादरपदे तत्पुरुषभ्रमन्निरस्यति । अनादर इतीति ॥ अस्मिन्सूत्रेऽसद्ग्रहणन्तु भाष्ये प्रत्याख्यातम् । गोष्पदं सेवितासेवितेतिसूत्रेऽसेवितपदे नञुपादानादगोष्पदस्यं वासःकृत्ये त्यस्यापि प्रकृतेऽनादरग्रहणेन सिद्धेः ॥ नपुंसकत्वोपपत्तये आह । शब्दस्वरूपे इतीति ॥ ननु पयःपानक्रियाया एव पूर्वकालिकत्वे न कृञ्धातोः क्त्वाप्रत्ययोऽनुपपन्न इत्यत आह । परावरयोगे चेतीति ॥

तदा न्यग्रोधस्य पैलो नलस्यैवेतिनियमार्थम्। तत्र। बिल्वादिगणे। एवञ्च पाटलानि पुष्पाणीत्यत्र प्राप्तोपि लुप्। भाष्ये मूलानीति पाठ इति। एवञ्च पुष्पेषु मल्लिका करवीरमित्युदाहरणं युक्तम्। मूले तु पाटलानीति वृत्तिग्रामाण्यादिति। तत्र हि बहुलग्रहणस्य प्रयोजननिरूपणावसरे न च भवति पाटलानि पुष्पाणि। साल्वानि मूलानीत्युक्तम्। तेषाम्। उणादीनाम्। यञञोर्लुगभावे हेत्वन्तरमाह। एककाल इति। उद्देश्यविधेयभावावगाहिशाब्दबोधे उद्देश्यतावच्छेदकप्रकारकज्ञानस्य पूर्वकालिकत्वनियमात्। व्यर्थत्वापत्तेरिति। प्रातिपदिकादित्यनेनान्वयाय पञ्चमीनिर्देशस्य कर्तुमुचितत्वादिति भावः॥

## ॥ इति विकारार्थकाः ॥

## ॥ प्राग्दीव्यतीयाः समाप्ताः ॥

तस्य चेति। समुदायस्य चेत्यर्थः। हृत्ताविति। माशब्दिक इत्यादिवृत्तावित्यर्थः। अत्रास्येति। स्वागतादिगणे। मैवेति। करणतृतीयैवेत्यर्थः। अत्र। दीव्यतीत्यादौ। इत्युक्तमिति। आख्यातत्वविशिष्टार्थस्येतिन्यायात्। इह। पर्यादिगणे। सूत्रोपात्तत्वादिञ्निमित्तकेतिभ्रमसंवारणायाह। यत्किञ्चिन्निमित्तक इति। एतदेवेति मूलस्य श्वादेरितिसूत्रमेवेत्यर्थः। शौवहानमिति। श्वहानेरिदमित्यर्थः। ननु श्वापदशब्दाहडाच्छः स्यादत आह। अभिधानेति। निषेव इति। इकारादाविति वचनेन। त्रैमैत्रिमित्यत्र। तेन दीव्यतीत्यतस्तेनेति वर्त्तते। त्रिप्रत्ययान्तात्तृतीयान्तान्नित्यम्मविति वाक्यार्थः। अत्र वाक्यन्निवृत्यर्थन्नित्यग्रहणम्। अत एव पाकेन निर्वृत्तमिति वाक्ये न त्रिप्रत्ययान्तसमानार्थकेन विग्रहं कुर्वन्ति। ननु त्रिशब्देन सङ्ख्यावाचकस्य त्रिशब्दस्य क्त्रिप्रत्ययस्य च ग्रहणम्प्राप्नोति। न च त्रयाणामित्यत्र मप्रत्ययादर्शनेन सङ्ख्याया न ग्रहणमिति वाच्यम्। तृतीयान्तत्वे एव मन्निषयत्वप्रतिपादनादत आह। ड्वितः क्त्रिरेवेति। व्याख्यानादिति। वक्ष्यमाणभाष्यसम्मतव्याख्यानादित्यर्थः। त्रेरिति भित्रमिति। त्रेसचिति भित्रमित्यर्थः। त्रिप्रत्ययान्तप्रकृतिकतृतीयान्तस्य वाक्ये प्रयोगः नेना-

त्यपि प्रत्युदाहरणं युक्तमेव। अस्मायामेधेति सूत्रे धीर्धारणावती मेधेति; बुद्धि-विशेषे रूढस्यैवाभिव्यक्तेतिन्यायेन ग्रहणमिदम्प्रत्युदाहरणन्तु बुद्धिसामान्यला-क्षणिकस्य मेधाशब्दस्य। किञ्च चिकीर्षावानिति यदुक्तन्तदपि नोचितम्। अ-स्मिन्नेव सूत्रे इह कस्मान्नभवति चिकीर्षास्ति जिहीर्षास्ति। प्राण्यङ्गादिति वक्तव्यम्। तत्तर्हि वक्तव्यन्न वक्तव्यम्। कस्मान्न भवति। चिकीर्षास्तीति अन-भिधानादिति भाष्यकृदुक्तानविधानात्। वस्तुतो मनीषावान्। धिषणावानि-ति प्रत्युदाहरणमित्याहुः। एतच्चेति। लचश्चकारस्य स्वरितत्वाधनार्थत्वम्। चकारोच्चारणसामर्थ्याल्लचो लकारात्परः स्वर उदात्त एवेति नियमेनेति तद्भा-वः। भाष्योक्तव्याख्यानादिति। तत्र हि सिध्मादिषु यान्यकारान्तानि तेभ्यो ल-चा मुक्ते इनिठनौ प्राप्नुतः। इनिठनौ च नेष्येते। कथन्तौ न भविष्यतः। ल-न्यतरस्यामिति समुच्चयोऽयन्न विभाषा लच्च मतुप् चेति भाष्योक्तव्याख्याना-दित्यर्थः। वत्सांसाभ्याङ्कामबले। एतद्व्याख्यानावसरे लज्वेति व्याख्यातन्तन्न युक्तम्। वृत्तिग्रन्थविरोधात्। तत्र हि न चायमर्थो मतुपि सम्भवतीति नित्यं लजेव भवतीति प्रतिपादितम्। वत्सांसाभ्यां यथा सङ्ख्याङ्कामवति बलवति चार्थे लजनेन विधीयते। सूत्रे कामबलशब्दौ अर्श आद्यजन्तौ। प्रज्ञा श्रद्धा। सौत्र-प्रज्ञाशब्दस्य प्रयोजनमाह। यद्यपीति। ननु अण्चेति सूत्रे योगविभाग उत्त-रार्थ इति व्याख्यातन्तच्च न्यूनम्। तपःसहस्रेति सूत्र एवाणः पाठे तपःसहस्र-योर्विनीन्योर्यथा सङ्ख्यन्न स्यादितीष्टार्थोऽपि योगविभाग इत्यत आह। तपःस-हस्राभ्यामिति। दन्त उन्नत उरच्। अत्र दन्तेति लुप्तविभक्तिकम्। उन्नतेति प्रकृतिविशेषणम्। दन्तशब्दादुन्नतोपाधिकादुरच्प्रत्ययो भवति मत्वर्थे। ऊष-शुषिमुष्क। द्रव्यवाचकमधुशब्दग्रहणशङ्का वारणायाह। रसवाचिन इति। स्पष्टञ्चेदम्भाष्य इति। तत्र ह्ययम्मधुशब्दोऽस्त्येव द्रव्यपदार्थकः। अस्ति रसवा-ची। अपि च मधुन्येव हि मध्विदम्मधुरमिति प्रयुज्यते तयोरसवाची तस्येद-म्ग्रहणमित्युक्तम्। रप्रत्ययास्तनगरशब्दस्त्विति। अश्मादित्वात्। अत एव। जातिवाचकत्वादेव। भाष्ये उक्तत्वं नेति। द्युद्रुभ्यां नित्यार्थमेके। कथम्। वि-भाषा मध्येऽयं योगः क्रियते विभाषामध्ये ये विधयस्ते नित्या भवन्तीति तत्रो-क्तम्। व्याख्यानादिति। तत्पूर्वभाष्यं वस्य पुनर्वचनं मत्वविभाषार्थम्। केशा-

